योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०४८

अष्टचत्वारिंशः सर्गः ४८

श्रीवसिष्ठ उवाच ।

रूढे संसारनिर्वेदे स्थिते साधुसमागमे ।

शास्त्रार्थे भाविते बुद्ध्या भोगवैतृष्ण्य आगते ।। १

जाते विषयवैरस्ये सज्जनत्वे तथोदिते ।

प्रकाशे सोन्मुखीभूते हृदये कलितोदये ।। २

धनानि नाभिवाञ्छयन्ते तमांसीव विवेकिना ।

त्यज्यन्ते विद्यमानानि संशुष्कामेध्यपर्णवत् ।। ३

भाराय पान्थदृष्ट्येव दृश्यन्ते दारबन्धवः ।

यथाशक्ति यथाकालमुपचर्यन्त एव च ।। ४

इन्द्रियेष्वपि संलग्ना इन्द्रियार्थाः पुनःपुनः ।

न भोगा अनुभूयन्ते नूनं शान्तमनस्तया ।। ५

एकान्तेषु दिगन्तेषु सरःसु विपिनेषु च ।

उद्याने पुण्यदेशेषु निजेष्वेव गृहेषु वा ।। ६

सुहृत्केलिविलासेषु शुभोद्यानाशनादिषु ।

शास्त्रतर्कविचारेषु न तथा स्थीयते चिरम् ।। ७

उपशान्तेन दान्तेन स्वात्मारामेण मौनिना ।

ज्ञातैवान्विष्यते ज्ञेन विज्ञानैकान्तवादिना ।। ८

एवमभ्यासवशतः परे विश्रम्यते पदे ।

निम्नेवाम्भसि शान्तेन स्वयमेव विवेकिना ।। ९

सबाह्याभ्यन्तरं शान्ता ज्ञतैवार्थतयोदिता ।

न संभवति भिन्नोऽर्थ इत्येव परमं पदम् ।। १०

नार्थोपलब्धिर्नो शून्यमस्ति बोधात्मतां विना ।

इत्यन्तरनुभूतिस्थमाहुस्तत्परमं पदम् ।। ११

एकबोधातिसंबन्धपरिणामान्न बोधता ।

न शून्यता नार्थतेति विद्धि तत्परमं पदम् ।। १२

स्वसंविन्मात्रविश्रामवताममनसां सताम् ।

न स्वदन्ते हि विषयाः पयांसि दृषदामिव ।। १३

निरोधपदमापन्नो निर्मना मौनमन्थरः ।

स्वभावे स्थित एवास्ते चित्रे कृत इवात्मवान् ।। १४

सर्वार्थमर्थरहितं महदेव पराणुवत् ।

अशून्यमेव शून्यात्म हृदयं वेद्यवेदिनः ।। १५

अहंत्वं जगदीहादि दिक्कालकलनादि च ।

ज्ञस्य ज्ञानादि शून्यादि स्थितमेव न विद्यते ।। १६

ज्ञेनामलपदस्थेन दीपेनेव निरस्यते ।

तमो हार्दं तथा बाह्यं रागद्वेषभयादि च ।। १७

रजोरहितसर्वांशं सत्त्वात्पारमुपागतम् ।

असंभवत्तमोरूपं प्रणमेत्तं नृभास्करम् ।। १८

भेदप्रविलये जाते चित्ते चादृश्यतां गते ।

या स्थितिः प्राप्तबोधस्य न वाग्गोचरमेति सा ।। १९

ददात्येतन्महाबुद्धे निर्वाणं परमेश्वरः ।

अहर्निशं परमया चिरं भक्त्या प्रसादितः ।। २०

श्रीराम उवाच ।

ईश्वरः को मुनिश्रेष्ठ कथं भक्त्या प्रसाद्यते

एतन्मे तत्त्वतो ब्रूहि सर्वतत्त्वविदां वर ।। २१

श्रीवसिष्ठ उवाच ।

ईश्वरो न महाबुद्धे दूरे न च सुदुर्लभः ।

महाबोधमयैकात्मा स्वात्मैव परमेश्वरः ।। २२

तस्मै सर्वं ततः सर्वं स सर्वं सर्वतश्च सः ।

सोऽन्तः सर्वमयो नित्यं तस्मै सर्वात्मने नमः ।। २३

तस्मादिमाः प्रसूयन्ते सर्गप्रलयविक्रियाः ।

अकारणं कारणतो गतयः पवनादिव ।। २४

अनिशं पूजयन्त्येताः सर्वाः स्थावरजङ्गमाः ।

यथाभिमतदानेन सर्वे ते भूतजातयः ।। २५

सुबहून्येष जन्मानि यथाभिमतयेच्छया ।

यदा संपूजितस्तेन प्रसादमधिगच्छति ।। २६

प्रसन्नः स महादेवः स्वयमात्मा महेश्वरः ।

बोधाय प्रेरयत्याशु दूतं पूतं शुभेहितैः ।। २७

श्रीराम उवाच ।

आत्मना परमेशेन को दूतः प्रेर्यते मुने ।

स दूतो बोधनं वापि करोति वद मे कथम् ।। २८

श्रीवसिष्ठ उवाच ।

आत्मसंप्रेरितो दूतो विवेको नाम नामतः ।

हृद्गुहायां सदानन्दस्तिष्ठतीन्दुरिवाम्बरे ।। २९

स एष वासनात्मानं जन्तुं बोधयति क्रमात् ।

संसारसागरादस्मात्तारयत्यविवेकिनम् ।। ३०

बोधात्मैषोऽन्तरात्मैव परमः परमेश्वरः ।

अस्यैव वाचको नाम प्रणवो वेदसंमतः ।। ३१

जपहोमतपोदानपाठयज्ञक्रियाक्रमैः ।

एष प्रसाद्यते नित्यं नरनागसुरासुरैः ।। ३२

द्यौर्मूर्धा पृथिवी पादौ तारका रोमराजयः ।

भूतान्यस्थीनि हृदयं व्योमास्य परमेश्वरः ।। ३३

सर्वत्रैष चिदात्मत्वाद्याति जागर्ति पश्यति ।

तेनैष सर्वतोलक्ष्यकरकर्णाक्षिपादभृत् ।। ३४

विवेकदूतमुद्बोध्य हत्वा चित्तपिशाचकम् ।

आत्मनः पदवीं स्फारां जीवः कामपि नीयते ।। ३५

त्यक्त्वा सर्वविकल्पौघान्विकारानर्थसंकरान् ।

पौरुषेणात्मनैवात्मा स्वयमेव प्रसाद्यताम् ।। ३६

भ्रमन्मनःपिशाचेऽस्मिन्कल्लोलजलदाकुले ।

संसाररात्रितिमिरे स्वात्मैवापूर्णचन्द्रमाः ।। ३७

अगाधमरणावर्तकल्लोलाकुलकोटरे ।

तृष्णातरङ्गतरले स्वमनश्चण्डमारुते ।। ३८

महाजडलवाधारे संसारविषमार्णवे ।

इन्द्रियग्रामगहने विवेकः पोतको महान् ।। ३९

पूर्वं यथाभिमतपूजनसुप्रसन्नो

दत्वा विवेकमिह पावनदूतमात्मा ।

जीवं पदं नयति निर्मलमेकमाद्यं

सत्सङ्गशास्त्रपरमार्थपरावबोधैः ।। ४०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षो० निर्वाणप्रकरणे उ० विवेकमाहात्म्यं नामाष्टचत्वारिंशः सर्गः

।। ४८ ।।